श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटशेषार्यानुगृहीता

# ॥ श्रीकोदण्डपाणिसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to U. Ve. Sri. V. S. Karunakarachar Swami and Sri. Ananthanarayana of Chennai for their help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोदण्डपाणिसुप्रभातम् ॥

वन्दे वेङ्कटशेषार्यं वत्सवंशशिरोमणिम्।
वात्स्यश्रीवरदाचार्यतनयं करुणानिधिम्॥

श्रीरामचन्द्र करुणावरुणालय श्री
सीतामुखाम्बुजविकासक बालसूर्य!।
सौमित्रिमित्र! भरताभिरताप्तमित्र!
शत्रुघ्न हे! रघुपते! तव सुप्रभातम्॥ १ ॥

भास्वानुदेति विकचानि सरोरुहाणि
पश्य स्मरन् मधुरकूजितषड्पदानि।
त्वद्वीक्षणोन्मिषितनाभिसरोजवेधो-
वेदध्वनेः रघुपते! तव सुप्रभातम्॥ २ ॥

त्वां बोधयन्ति परितः श्रुतयः श्रुतीनां
सारेण सानुज! भवत्प्रतिबोधकेन।
श्लोकेन कौशिकमुखोद्गलितेन कर्ण-
पीयूषवद्रघुपते! तव सुप्रभातम्॥ ३ ॥

त्वां बोधयन्ति विबुधाः श्रुतिभोग्यवेणु-
वीणामृदङ्गपणवादिततानुवादैः।
स्तोत्रैर्धरासुरवरस्तुतिघोषमित्रैः
आकर्ण्यतां रघुपते! तव सुप्रभातम्॥ ४ ॥

उद्यानवासरसिकाः शुकशारिकाद्याः
हृद्या हरेहरिरिति द्विजघोषहृद्यैः।
हृद्यां मुदं विदधतीह तवापदान-
पद्यैर्द्विजाः रघुपते! तव सुप्रभातम्॥ ५ ॥

www.prapatti.com

ब्रह्मा शिवश्शतमखश्च मखाशनौघैः
त्वद्धाम गोपुरभुवि प्रतिपालयन्ति।
त्वत्पादपङ्कजसिषेविषवोऽविशेषं
भक्तैर्द्विजै रघुपते! तव सुप्रभातम्॥ ६॥

सूर्येन्दुसन्निधिवशादिव देवसङ्घैः
सोत्फुल्लवक्त्रकमलाञ्जलिकुड्मलोकैः।
मन्दारसुन्दरकरैः प्रतिपाल्यतेर्चा-
बद्धादरैः रघुपते! तव सुप्रभातम्॥ ७॥

तीर्थाभिषेकपरिशुद्धधियोऽर्चकास्ते
पूर्णाभिषेककलशाः परिचारकाश्च।
स्तुत्वा भवन्तमभिषेकमुखोपचार-
चर्योत्सुका रघुपते! तव सुप्रभातम्॥ ८॥

सीतामुखेन्दुसविधेऽपि सदा प्रसन्नं
मन्दस्मितेन मधुरं सुधयेव लोकैः।
लंबाळकाळिललितं तव वक्त्रपद्मम्
संशोभतां रघुपते! तव सुप्रभातम्॥ ९॥

श्रीकोसलेश्वरपुराकृतभाग्यराशे!
श्रीकोसलेन्द्रतनयानयनाभिराम!।
साकेतसाधुकुलकाङ्क्षितकल्पकश्रीः!
सीतामनोहरमणे! तव सुप्रभातम्॥ १०॥

उद्दण्डशौण्डभुजखण्डितखण्डपर्शु-
कोदण्डचण्डरवपिण्डितसाण्डजाण्ड!।
कोदण्डदण्डवरमण्डितबाहुदण्ड!
श्रीखण्डचर्चिततनो! तव सुप्रभातम्॥ ११॥

इत्थं वेङ्कटशेषेण सुप्रभातस्तुतिः कृता।
श्रीरामचरणाम्भोजयुगभूषा समर्पिता॥ १२॥

www.prapatti.com

नीलोत्पलानि सरसीष्विह सङ्कुचन्ति
सापत्रपाणि तव दृग्तुलयोर्विलासे।
धामानि ते च विकचानि सरोरुहाणि
श्रीरामचन्द्रदयिते! तव सुप्रभातम्॥ १३॥

प्रातस्सुवर्णमणिदर्पणनायिकास्य-
वीक्षां वदन्ति सुधियः शुभमेव पत्युः।
सर्वं त्वदाननविलोकनतोऽस्य सिध्येत्
उत्तिष्ठ मैथिलसुते! तव सुप्रभातम्॥ १४॥

॥ इति श्रीकोदण्डपाणिसुप्रभातं समाप्तम्॥



www.prapatti.com